भवतीति" चिन्तामणिः। अवच्छेदकता हि स्वरूपसम्बन्धविशेषः अनतिरिक्तवृत्तित्वं वा तन्निरूपितत्वमवच्छिन्नत्वं यथा दण्डादीनां घटकारणतावच्छेदकं दण्डत्वादिकं तस्य तदतिरिक्तदेशेऽवृत्तित्वात् एवं घटादीनामत्यन्ताभाव-प्रतियोगितायाः तदतिरिक्तदेशेऽवृत्तित्वात् घटत्वादिक-मवच्छेदकम् अतः प्रतियोगितायां घटाद्यवच्छिन्नत्वम्। परिमाणादौ च अवच्छिन्नत्वमियत्ताकरणम् यथा द्रोणाव-च्छिन्नोव्रीहिः द्रोणपरिमाणेन कृतपरिच्छेदोव्रीहिरित्यर्थः। सीमाकरणमप्यवच्छेदः। गृहावच्छिन्न आकाशः गृहाकाशः कर्णशष्कुल्यवच्छिन्न आकाशः श्रोत्रमित्यादि। एवमन्तः-करणावच्छिन्नं चैतन्यं जीव इति वेदान्तिनः।

**अवच्छिन्नवाद** पु० अवच्छिन्नतया अन्तःकरणावच्छिन्नतया जीवस्य वादोव्यवस्थापनम्। वेदान्तिमतप्रसिद्धे चैतन्यस्य अन्तःकरणावच्छिन्नतया व्यवस्थापके मतभेदे। तथाहि तेषां मतद्वैधम् केचित् अन्तःकरणे प्रतिविम्बितं चैतन्यं जीव इति प्रतिपेदिरे केचित्तु तदवच्छिन्नं चैतन्यंजीव इति। तत्र नीरूपस्य चैतन्यस्यान्तःकरणे प्रतिविम्बासम्भवेन प्रति-विम्बस्य च मिथ्यात्वेन जीवस्य सत्यत्वानुपपत्तेः बन्ध-मोक्षयोः सामानाधिकरण्याभावापत्तेः प्रतिविम्बवादं दूषयित्वाऽवच्छिन्नवादं समर्थयाञ्चक्रिरे। यथा च नैयायि-कादीनामेकस्यापि नभसः कर्णशष्कुल्यादिभेदेन उपाधि-कृतं नानात्वं न वस्तुकृतमेवमेकस्यापि चैतन्यस्यान्तःकर-णोपाधिभेदेनावच्छिन्नतया नानात्वं तेन "तद्गुणसार-त्वात्" शा० सू० "घटसंवृतआकाशे नीयमाने यथा घटे। घटोनीयेत नाकाशस्तद्वज्जीवोनभोपमः" इत्युक्तेश्च जीवस्य न स्वत इहलोकपरलोकगामित्वमपि तु बुद्धिरूपाधि-भेदन तथाव्यवहारः अतो न बन्धमोक्षव्यवस्थानुपपत्तिः यन्निरुपाधौ अज्ञानाधीना संसारप्रवृत्तिस्तस्य जीवभावा-त्मकतया बन्धः, यत्र च तन्निवृत्तिः न तत्र तथा, किन्तु-मोक्षः। विस्तरस्त्वाकरे।

**अवच्छुरित** न०। अव+छुर–भावे क्त। १अट्टहासे–स्वार्थे कन् तत्रैव। कर्म्मणि क्त। २मिश्रिते त्रि०।

**अवच्छेद** पु० अव+छिद–भावे घञ्। १छेदने २सीमाकरणे ३विशेषकरणे ४अवधारणे "शब्दार्थानामवच्छेदे विशेषस्मृति हेतवः" वाक्य प० ५इयत्ताकरणे ६व्याप्तौ च। अवच्छिद्यते ऽनेन करणे घञ्। इयत्ताकरणसाधने ७एकदेशे अवय-वादौ। यः कश्चित् पदार्थः कस्मिंश्चिदाधारे एकदेशे तिष्ठति तत्रैव प्रदेशान्तरे चेन्न तिष्ठतीति स अव्याप्यवृत्तिः तस्याव्याप्यवृत्तितायाः निरूपकोऽवयवादिः। यथा वृक्षे अग्रदेशे कपिसंयोगः मूलदेशे तदभावः अतः कपि-संयोगः अव्याप्यवृत्तिः तादृशाव्याप्यवृत्तितायाः नियाम-कस्य मूलादिप्रदेशः तत्रावच्छेदशब्देनाभिधीयते। तादृशा-वच्छेदश्च द्विविधः देशः कालश्च। तत्र देशसत्त्वे काल विशेषे तदभावात् कालएव तत्राव्याप्यवृत्तितायांनियामकः। यथा आत्मनि जाग्रदादौ ज्ञानं सुषुप्तौ तदभावः। देशरूपस्तूक्तः। अवच्छेदावच्छेदेन साध्यसिद्धौ सामा-नाधिकरण्यसिद्धिः प्रतिबन्धिका इति शिरोमणिः। अव-च्छेदाः यावन्तः साध्यसिद्धौ प्रदेशास्तावतामेवावच्छेदेन साध्यसम्बन्धव्यापकत्वेनेति तदर्थः।

**अवच्छेदक** त्रि० अवच्छिनत्ति अव+छिद–ण्वुल्। १छेदके २इयत्ताकारके ३सीमाकारके ४अवधारके ५अव्याप्यवृत्ति तानिरूपके च। अवच्छिन्नशब्दे विवृतिः। "प्रतियोगिताव-च्छेदकावच्छिन्नमिति" चिन्तामणिः। अवच्छेदकत्वं च अव-दके इव तदवच्छेदकेऽपि स्वीक्रियते यथा वह्निमान् पर्व्वत इति बुद्धौ वह्न्यभाववान् पर्व्वत इति निश्चयःप्रतिबन्धकः तत्र प्रतिबन्धकतावच्छेदकं निश्चयत्वमिव तत्तद्विषयताऽपि तत्रा-वच्छेदिका तथा च वह्नित्वावच्छिन्नप्रकारतानिरूपितपर्व्वत-त्वावच्छिन्नविशेष्यताशालिज्ञानत्वावच्छिन्नं प्रति वह्नित्वाव-च्छिन्नप्रकारतानिरूपिताभावत्वावच्छिविशेष्यतासमानाधि–करणप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनि–श्चयत्वेन प्रतिबन्धकत्वे निश्चयत्वस्येव तत्तद्विषयताया अपि तत्प्रतिबन्धकतावच्छेदकत्वं तथा तादृशज्ञानत्वस्येव तत्तद्विष-यताया अपि प्रतिबध्यतावच्छेदकत्वम्। इयांस्तुभेदः अनुल्ले-ख्यमानजातेः स्वरूपतोऽवच्छेदकत्वं न तदवच्छेदकताया अव-च्छेदकमस्ति तेन घटवद्भूतलमिति बुद्धौ घटत्वनिष्ठप्रका-रतावच्छेदकताया नान्यदवच्छेदकम् तथाच यथा घटनिष्ठ-प्रकारताया अवच्छेदकम् घटत्वम् एवं घटत्वनिष्ठप्रका रतायानान्यदवच्छेदकमतस्तस्य निरच्छिन्नावच्छेदकता अनु-ल्लिख्यमानेत्युक्तेरुल्लिख्यमानजातेर्नस्वरूपतोऽवच्छेदकत्वं तेन घटत्ववत्त्वान् देश इत्यादौ घटत्वप्रकारताया अवच्छे-दकमस्तीति। अत्राप्ययं विशेषः धर्म्मांशे भासमानधर्म्मः विशेष्यतावच्छेदकः प्रकारांशे भासमानः प्रकारताच्छेदकएवं सर्व्वत्र। किन्तु प्रतियोग्यंशे भासमानधर्म्मस्य न प्रतियो-गितावच्छेदकत्वमपि तु अतिप्रसङ्गाद्यनापादकस्यैव धर्मस्य तथात्वं यथा कम्बुग्रीवादिमान्नास्ति इत्याद्यभावबुद्धौ घटत्वस्यैव प्रतियोगितावच्छेदकत्वम् "सम्भवति लघौ